श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री-अभीतिस्तवः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री-अभीतिस्तवः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अभीतिरिह यज्जुषां यदवधीरितानां भयं
भयाभय विधायिनो जगति यन्निदेशे स्थिताः।
तदेतदतिलङ्घित द्रुहिण शम्भु शक्रादिकं
रमासखमधीमहे किमपि रङ्गधुर्यं महः॥ १॥

दया शिशिरिताशया मनसि मे सदा जागृयुः
श्रियाऽध्युषित वक्षसः श्रित मरुद् वृधा सैकताः।
जगद्दुरित घस्मरा जलधि डिम्भ डम्भस्पृशः
सकृत्प्रणत रक्षण प्रथित संविदः संविदः॥ २॥

यदद्य मित बुद्धिना बहुळ मोह भाजा मया
गुण ग्रथित काय वाङ्मनस वृत्ति वैचित्र्यतः।
अतर्कित हिताहित क्रम विशेषमारभ्यते
तदप्युचितमर्चनं परिगृहाण रङ्गेश्वर॥ ३॥

मरुत्तरणि पावक त्रिदश नाथ कालादयः
स्वकृत्यमधिकुर्वते त्वदपराधतो बिभ्यतः।
महत् किमपि वज्रमुद्यतमिवेति यच्छ्रूयते
तरत्यनघ तद्भयं य इह तावकः स्तावकः॥ ४॥

भवन्तमिह यः स्व धी नियत चेतनाचेतनं
पनायति नमस्यति स्मरति वक्ति पर्येति वा।
गुणं कमपि वेत्ति वा तव गुणेश गोपायितुः
कदाचन कुतश्चन क्वचन तस्य न स्यात् भयम्॥ ५॥

स्थिते मनसि विग्रहे गुणिनि धातु साम्ये सति
    स्मरेदखिल देहिनं य इह जातुचित् त्वामजम्।
तयैव खलु संधया तमथ दीर्घ निद्रावशं
    स्वयं विहित संस्मृतिर्नयसि धाम नैःश्रेयसम्॥ ६ ॥

रमादयित रङ्गभूरमण कृष्ण विष्णो हरे
    त्रिविक्रम जनार्दन त्रियुग नाथ नारायण।
इतीव शुभदानि यः पठति नामधेयानि ते
    न तस्य यम वश्यता नरक पात भीतिः कुतः ॥ ७ ॥

कदाचिदपि रङ्गभू रसिक यत्र देशे वशी
    त्वदेक नियताशयस्त्रिदश वन्दितो वर्तते।
तदक्षत तपोवनं तव च राजधानी स्थिरा
    सुखस्य सुखमास्पदं सुचरितस्य दुर्गं महत्॥ ८ ॥

त्रिवर्ग पथ वर्तिनां त्रिगुण लङ्घनोद्योगिनां
    द्विषत्प्रमथनार्थिनामपि च रङ्ग दृश्योदयाः।
स्खलत्समय कातरी हरण जागरूकाः प्रभो
    कर ग्रहण दीक्षिताः क इव ते न दिव्या गुणाः ॥ ९ ॥

बिभेति भवभृत् प्रभो त्वदुपदेश तीव्रौषधात्
    कदध्व रस दुर्विषे बळिश भक्षवत् प्रीयते।
अपथ्य परिहार धी विमुखमित्थमाकस्मिकी
    तमप्यवसरे क्रमादवति वत्सला त्वद्दया॥ १० ॥

अपार्थ इति निश्चितः प्रहरणादि योगस्तव
    स्वयं वहसि निर्भयस्तदपि रङ्ग पृथ्वीधर।
स्वरक्षणमिवाभवत् प्रणत रक्षणं तावकं
    यदात्थ परमार्थविन्नियतमन्तरात्मेति ते॥ ११ ॥

लघिष्ठ सुख सङ्गदैः स्वकृत कर्मनिर्वर्तितैः
    कळत्र सुत सोदरानुचर बन्धु संबन्धिभिः।

धन प्रभृतिकैरपि प्रचुर भीति भेदोत्तरैः
न बिभ्रति धृतिं प्रभो त्वदनुभूति भोगार्थिनः ॥ १२ ॥

न वक्तुमपि शक्यते नरक गर्भ वासादिकं
वपुश्च बहु धातुकं निपुण चिन्तने तादृशम्।
त्रिविष्टप मुखं तथा तव पदस्य देदीपतः
किमत्र न भयास्पदं भवति रङ्ग पृथ्वीपते॥ १३ ॥

भवन्ति मुख भेदतो भय निदानमेव प्रभो
शुभाशुभ विकल्पिता जगति देश कालादयः।
इति प्रचुरसाध्वसे मयि दयिष्यसे त्वं न चेत्
क इत्थमनुकम्पिता त्वदनुकम्पनीयश्च कः ॥ १४ ॥

सकृत् प्रपदन स्पृशामभय दान नित्यव्रती
न च द्विरभिभाषसे त्वमिति विश्रुतः स्वोक्तितः।
यथोक्त करणं विदुस्तव तु यातुधानादयः
कथं वितथमस्तु तत् कृपण सार्वभौमे मयि॥ १५ ॥

अनुक्षण समुत्थिते दुरित वारिधौ दुस्तरे
यदि क्वचन निष्कृतिर्भवति साऽपि दोषाविला।
तदित्थमगतौ मयि प्रतिविधानमाधीयतां
स्वबुद्धि परिकल्पितं किमपि रङ्गधुर्य त्वया॥ १६ ॥

विषाद बहुळादहं विषय वर्गतो दुर्जयात्
बिभेमि वृजिनोत्तरस्त्वदनुभूति विच्छेदतः।
मया नियत नाथवानयमिति त्वमर्थापयन्
दयाधन जगत्पते दयित रङ्ग संरक्ष माम्॥ १७ ॥

निसर्ग निरनिष्टता तव निरंहसः श्रूयते
ततस्त्रियुग सृष्टिवत् भवति संहृतिः क्रीडितम्।
तथाऽपि शरणागत प्रणय भङ्ग भीतो भवान्
मदिष्टमिह यद्भवेत् किमपि मा स्म तज्जीहपत्॥ १८ ॥

कयाधुसुत वायस द्विरदपुङ्गव द्रौपदी-
विभीषण भुजङ्गम व्रजगणाम्बरीषादयः।
भवत्पद समाश्रिता भय विमुक्तिमापुर्यथा
लभेमहि तथा वयं सपदि रङ्गनाथ त्वया॥ १९ ॥

भयं शमय रङ्गधाम्नयनितराभिलाष स्पृशां
श्रियं बहुळय प्रभो श्रित विपक्षमुन्मूलय।
स्वयं समुदितं वपुस्तव निशामयन्तः सदा
वयं त्रिदश निर्वृतिं भुवि मुकुन्द विन्देमहि॥ २० ॥

श्रियः परिबृढे त्वयि श्रित जनस्य संरक्षके
सदद्भुत गुणोदधाविति समर्पितोऽयं भरः।
प्रतिक्षणमतः परं प्रथय रङ्गधामादिषु
प्रभुत्वमनुपाधिकं प्रथित हेतिभिर्हेतिभिः॥ २१ ॥

कलि प्रणिधि लक्षणैः कलित शाक्य लोकायतैः
तुरुष्क यवनादिभिर्जगति जृम्भमाणं भयम्।
प्रकृष्ट निजशक्तिभिः प्रसभमायुधैः पञ्चभिः
क्षिति त्रिदश रक्षकैः क्षपय रङ्गनाथ क्षणात्॥ २२ ॥

दिति प्रभवदेहभिद्दहन सोम सूर्यात्मकं
तमःप्रमथनं प्रभो समुदितास्त्र बृन्दं स्वतः।
स्ववृत्ति वश वर्तित त्रिदश वृत्ति चक्रं पुनः
प्रवर्तयतु धाम्नि ते महति धर्म चक्र स्थितिम्॥ २३ ॥

मनु प्रभृति मानिते महति रङ्ग धामादिके
दनु प्रभव दारुणैर्दरमुदीर्यमाणं परैः।
प्रकृष्ट गुणक श्रिया वसुधया च सन्धुक्षितः
प्रयुक्तकरुणोदधिः प्रशमय स्वशक्त्या स्वयम्॥ २४ ॥

भुजङ्गम विहङ्गम प्रवर सैन्यनाथाः प्रभो
तथैव कुमुदादयो नगर गोपुर द्वारपाः।

अचिन्त्य बल विक्रमास्त्वमिव रङ्ग संरक्षकाः
जितं त इति वादिनो जगदनुग्रहे जाग्रतु॥ २५॥

विधिस्त्रिपुरमर्दनस्त्रिदशपुङ्गवः पावकः
यम प्रभृतयोऽपि यद्विमत रक्षणे न क्षमाः।
रिरक्षिषति यत्र च प्रतिभयं न किञ्चित् क्वचित्
स नः प्रतिभटान् प्रभो शमय रङ्गधामादिषु॥ २६॥

स कैटभ तमो रविर्मधु पराग झञ्झामरुत्
हिरण्य गिरि दारणस्त्रुटित कालनेमि द्रुमः।
किमत्र बहुना भजद्भव पयोधि मुष्टिन्धयः
त्रिविक्रम भवत्क्रमः क्षिपतु मङ्क्षु रङ्गद्विषः॥ २७॥

यति प्रवर भारती रस भरेण नीतं वयः
प्रफुल्ल पलितं शिरः परमिह क्षमं प्रार्थये।
निरस्त रिपुसंभवे क्वचन रङ्गमुख्ये विभो
परस्पर हितैषिणां परिसरेषु मां वर्तय॥ २८॥

प्रबुद्ध गुरु वीक्षण प्रथित वेङ्कटेशोद्भवाम्
इमामभयसिद्धये पठत रङ्गभर्तुः स्तुतिम्।
भयं त्यजत भद्रमित्यभिदधत् स वः केशवः
स्वयं घन घृणा निधिर्गुणगणेन गोपायति॥ २९॥

॥ इति श्री-अभीतिस्तवः समाप्तः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥